**शरासन** पु॰ शराः अस्यन्तेऽनेन अस–ल्युट्। १धनुषि अमरः। शराणामासनम्। २तूणे च।

**शरिमन्** पु॰ शॄ–उणा॰ इमनिच्। प्रसवे सि॰कौ॰।

**शरी** स्त्री शीर्य्यते शॄ–ई। एरकाख्ये भावप्र॰।

**शरीर** न॰ शॄ–ईरन्। प्रतिक्षणं शीयमाणे १देहे। तस्य अङ्गप्रत्यङ्गभेदा भावप्र॰ उक्ता यथा "गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः। प्रकृतिः सविकारा च तत् सर्वं गर्भसंज्ञकम्। कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः। भवेत्तदा स मुनिभिः शरीरीति निगद्यते"। अङ्गोपाङ्गसंयुतः व्यक्ताङ्गोपाङ्गः। "तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः। सस्तकादभि धीयन्ते शिष्याः! शृणुत यत्नतः। आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः। तस्यान्तर्मस्तुलुङ्गं च ललाटं भ्रूयुगन्तथा। नेत्रद्वयं तयोरन्तर्वर्त्तेते द्वे कनीनिके। दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनी। पक्ष्माण्यपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम्। पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता। ओष्ठाधरौ च सृक्किण्यौ मुखं तालु हनुद्वयम्। दन्ताश्च दन्तवेष्टाश्च रसना चिबुकङ्गलः। द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्य्यते। तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे। तत्रोपरिगतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः। कफोणियुग्मं तदधः प्रकोष्ठयुगलन्तथा। मणिबन्धौ तले हस्तौ तयोश्चाङ्गुलयो दश। नखाश्च दश ते ख्याता दश ज्ञेयाः प्रकीर्त्तिताः। चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे। स्तनौ पुंसस्तथा नार्य्या विशेष उभयोरयम्। यौवनागमने नार्य्याः पीवरौ भवतः स्तनौ। गर्भवत्याः प्रसूतायास्तावेव क्षीरपूरितौ। हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम्। जाग्रतस्तद्विकसति स्वपतस्तु निमीलति। आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम्। अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि"। चेतनास्थानमुत्तममित्यस्याभिप्रायः "कैशलोमनखाद्यं च मलं, द्रव्यगुणैर्विना" इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानमुक्तम् तदपेक्षया हृदयं विशेषतश्चेतनास्थानमिति "कक्षयोर्वक्षसः सन्धी जत्रुणी समुदाहृते। कक्षे उभे समाख्याते तयोः स्यातां च वङ्क्षणौ। उदरं पञ्चमञ्चाङ्गं षष्ठं पार्श्वद्वयं मतम्। सपृष्ठवंशं तु तथा समस्तं षष्ठमं स्मृतम्। उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः। शोणिताज्जायते प्लीहा वामतो हृदयादधः। रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः। हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः। अधो दक्षिणतश्चापि हृदयाद् यकृतः स्थितिः। तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्। अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति। जलवाहिशिरामूलं तृष्णाच्छादनकन्मतम्"। क्लोम तिलकम् एतत्तु वातरक्तजम्। अत्र वृद्धवाग्भटः "रक्तादनिलसंसक्तात्कालीयकसमुद्भव" इति "मेदःशोणितयोः साराद्वृक्कयोर्युगलं भवेत्। तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः। उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः। अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्द्दिशेत्। उन्दुकस्य कटी चापि त्रिकं वस्तिश्च वङ्क्षणौ। कण्डराणां प्ररोहः स्यात् स्थानं तद् वीर्य्यमूत्रयोः। स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः। शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता। वृषणौ भवतः सारात्कफासृङ्मांसमेदसाम्। वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषावहौ। गुदस्य मानं सर्वस्य सार्द्धं स्याच्चतुरङ्गुलम्। तत्र स्युर्वलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः। प्रवाहिणी भवेत् पूर्वा सार्द्धाङ्गुलमिता मता। उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता। तस्याधः संवरणी स्यादेकाङ्गुलसमा मता। अर्द्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतम्। मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्म्मितः। पुंसः प्रोथौ स्मृतौ यौ तु तौ नितम्बौ च योषितः। तयोःककुन्दरे स्यातां सक्थिनी त्वङ्गसप्तमम्। तदुपाङ्गानि च ऊरू जानुनी पिण्डिकाद्वयम्। जङ्घे द्वे घुण्टिके पार्ष्णीतले च प्रपदे तथा। पादाङ्गुलयस्तत्र दश तासां नखा दश"।

**शरीरक** पु॰ शरीरं कायति आत्मत्वेनाभिमन्यते कै–क। जीवे। स्वार्थे वुञ्। शारीरकोऽप्यत्र।

**शरीरज** पु॰ शरीरात् जायते जन–ड। १रोगे २कामदेवे ३पुत्रे च धरणिः। ४देहजातमात्रे त्रि॰।

**शरीरावरण** न॰ शरीरमावृणोति आ+वृ–युच्। देहव्यापिनि १चर्म्मणि राजनि॰। २देहावरके त्रि॰। ल्युट्। ३देहाच्छादने न॰। [जटा॰।

**शरीरिन्** पु॰शरीरमात्माभिमानाश्रयत्वेनास्त्यस्य इनि। जीवे

**शरु** पु॰ शॄ–उन्। १क्रोधे २वज्रे मेदि॰। ३वाणे हेमच॰। ४आयुधे च संक्षिप्तसा॰।